# ॥ वैयाकरणसिद्धान्तकौमुदी ॥

## संज्ञाप्रकरणम् (७)

## २८.०७.२०१०

# पुनरावर्तनम्

- बाह्यप्रयत्नाः,
- ऋलृवर्णयोः मिथः सावर्ण्यं वाच्यम्,
- नाज्झलौ ।

# १३. नाज्झलौ (१.१.१०)

- पदद्वयम् । न, आ+अच्+हलौ ।
- आकारसहितः अच् आच्, स च हल् च इत्येतौ मिथः सवर्णौ न स्तः ।
- तेन दधि इत्यस्य हरति शीतलं षष्ठं सान्द्रमित्येतेषु परेषु यणादिकं न ।
- स्वराणां व्यञ्जनानां परस्परं सावर्ण्यं न भवतीति सामान्यतः अर्थः ।

- अत्र प्रश्नः – इकार-शकारयोः सावर्ण्ये सत्यपि सवर्णदीर्घः कथं भवति? अकः सवर्णे अचि परे सवर्णदीर्घः इति खलु सूत्रार्थः? यद्यपि हकारः अकारस्य सवर्णः, तथापि न अच्?
- एवमेव अकार-हकारयोः सावर्ण्ये सत्यपि दधि हरति इत्यत्र यण् कथम्? इकः स्थाने यण् स्यात् अचि संहितायां विषये । कथं हकारस्य अच्त्वम्?

# १४. अणुदित्सवर्णस्य चाप्रत्ययः (१.१.६९)

- चत्वारि पदानि । अणुदित्, सवर्णस्य, च, अप्रत्ययः ।
- प्रतीयते विधीयते इति प्रत्ययः । अविधीयमानः अण् उदिच्च सवर्णस्य संज्ञा स्यात् ।
- अण् = अ, इ, उ, ऋ, ऌ, ए, ओ , ऐ, औ, ह्, य्, व्, र्, ल्
- उदित् = उत् (=उकारः) इत् यस्य सः । कुँ, चुँ, टुँ, तुँ, पुँ ।

- अकः सवर्णे दीर्घः – दैत्य अरिः, विद्या+आलयः ।
- इको यणचि – मधु अरिः, वधू आदेशः ।
- अस्य च्वौ – शुक्लीभवति, मालीभवति ।
- एरच् – चि चयः, भी भयम् ।
-

- अविधीयमानः किम्?
- 'इदम इश्' – इदम् शब्दस्य 'इ' इत्यादेशः । ह्रस्वः एव आदेशः, न त्रिमात्रकः ।

- चोः कुः –
- वाच् भ्याम् ऊर्ज् भ्याम्
- वाक् भ्याम् (चोः कुः) ऊर्ग् भ्याम्
- वाग्भ्याम् ऊर्ग्भ्याम्

- अत्र अण् परेण णकारेण । अत्रैव इत्यर्थः ।
- तदेवम् – अ इति अष्टादशानां संज्ञा । तथा इकार-उकारौ ।
- ऋकारः त्रिंशतः । एवम् लृकारोऽपि ।
- उरण् रपरः – ऋकारस्य स्थाने यः अण् सः रपरो भवति । देव+ऋषिः = देवर्षिः । ऋकारस्य गुणः अर् ।
- लृकारस्य स्थाने यः अण् सः लपरो भवति । तव+लृकारः = तवल्कारः । लृकारस्य गुणः अल् ।

- एचः द्वादशानाम् । एदैतोः ओदौतोश्च न मिथः सावर्ण्यम् । ऐऔच् इति सूत्रारम्भसामर्थ्यात्। तेन एचः चतुर्विंशतेः संज्ञाः स्युः इति न आपादनीयम् ।
-

- नाज्झलौ इति सावर्ण्यनिषेधः आक्षरसमाम्नायिकानामेव –
- वर्णानामुपदेशस्तावत्, उपदेशोत्तरकाला इत्संज्ञा, इत्संज्ञोत्तरकालः 'आदिरन्त्येन सहेता' इति प्रत्याहारः, प्रत्याहारोत्तरकाला सवर्णसंज्ञा, सवर्णसंज्ञोत्तरकालम् 'अणुदित् सवर्णस्य चाप्रत्ययः' इति सवर्णग्रहणम् । एतेन सर्वेण समुदितेन वाक्येनान्यत्र सवर्णानां ग्रहणं भवति (महाभाष्ये)

१) माहेश्वरसूत्रेषु वर्णानाम् उपदेशः

२) 'हलन्त्यम्' इति इत्-संज्ञा

३) 'आदिरन्त्येन सहेता' इति प्रत्याहारः ।

४) 'तुल्यास्यप्रयत्नम् सवर्णम्' 'नाज्झलौ' इति सवर्णसंज्ञानिर्णयः ।

५) 'अणुदित् सवर्णस्य चाप्रत्ययः' इति सवर्णग्रहणम् ।

- अतः ’इको यणचि’ इत्यादिषु ’अचि’ इत्युक्ते सर्वेषां स्वराणां (१३२) ग्रहणम् ।
- ’नाज्झलौ’ इत्यत्र तु ’अच्’ इत्युक्ते माहेश्वरसूत्रस्थानामेव (९) ग्रहणम् ।
- अ, इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ – इत्येतेषां व्यञ्जनैः सह सावर्ण्यं नास्ति ।

- किन्तु आ, ई, ॠ – इत्येतेषां हकार-शकार-षकारैः सह सावर्ण्यम् न निवार्यते ।
- लिह् भिः विश्वपा भिः
- लिढ् भिः (हो ढः) विश्वप् ढ् भिः इति स्यात् ।
- लिड्भिः

- अतः ’नाज्झलौ’ इत्यत्र आ+अच्=आच्, न आच्-हलौ इति च्छेदः । अच्-हलोः परस्परं सावर्ण्यं न भवति, आकारस्य हलः चापि परस्परं सावर्ण्यं न भवतीति अर्थः ।
- ’नाज्झलौ’ इति सावर्ण्यनिषेधः यद्यपि आक्षरसमाम्नायिकानामेव, तथापि हकारस्य आकारः न सवर्णः। तत्र आकारस्यापि प्रश्लिष्टत्वात् । तेन विश्वपाभिः इत्यत्र हो ढः इति ढत्वं न भवति।
- 

- अनुनासिक-अननुनासिकभेदेन यवलाः द्विधा । तेन अननुनासिकास्ते द्वयोर्द्वयोः संज्ञाः ।
- य् – यँ्      व्-वँ्      ल्-लँ्
- संयमः – सँय्यमः   संवत्सरः-सँव्वत्सरः   विद्वान् लिखति – विद्वाँल्लिखति